# nIlarudropaniShat with commentary

# નીલરુદ્રોપનિષત્ દીપિકાસમેતા

## Document Information

Text title : nIlarudropaniShat with commentary

File name : nIlarudropaniShat.itx

Category : upanishhat, stotra, shiva

Location : doc_upanishhat

Author : nArAyaNavirachitadIpikA

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Source : Unpublished Upanishads, Adyar Library Atharva Veda - Shaiva upanishad

Latest update : August 22, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# નીલરુદ્રોપનિષત્ દીપિકાસમેતા

ૐ તત્સદ્બ્રહ્મણે નમઃ ।
નારાયણવિરચિતદીપિકાસમેતા ।

નીલરુદ્રોપનિપદિ ષોડશ્યાં ખણ્ડકત્રયમ્ ॥

શ્રુતિરૂપેણ તં દેવં સ્તૌત્યપશ્યમિતિ ક્રમાત્ ॥ ૧॥

અસ્પર્શયોગમુક્ત્વા તત્સમ્પ્રદાયપ્રવર્તકં પરમગુરું
યોગસિદ્ધિપ્રદં નીલરુદ્રં સ્તૌતિ-
ૐ અપશ્યં ત્વાઽવરોહન્તં દિવિતઃ પૃથિવીમવઃ ॥

અપશ્યમસ્યન્તં રુદ્રં નીલગ્રીવં શિખણ્ડિનમ્ ॥

દિવ ઉગ્રોઽવારુક્ષત્પ્રત્યષ્ઠાદ્ભૂમ્યામધિ ॥

અપશ્યમિતિ । દિવિતો દિવઃ । પૃથિવીં ભૂમિમવોઽવસ્તાદવરોહન્તં
ત્વામહમપશ્યમિતિ મન્ત્રદ્રષ્ટુર્વચઃ ।
અસ્યન્તમ્ । અસુ ક્ષેપણે । ક્ષિપન્તં દુષ્ટાન્ ।
અનેનાવતારપ્રયોજનમુક્તમ્ । અયં બ્રહ્મણઃ પુત્રઃ સનકાદિષુ
સૃષ્ટિમકુર્વત્સુ બ્રહ્મણઃ ક્રોધાદુત્પન્નઃ કુમારો રુરોદ
તેનાઽઽશ્વાસ્ય રુદ્ર ઇતિ નામ દત્તં તત એકાદશ સ્થાના-
ન્યેકાદશ નામાન્યેકાદશ પત્નીશ્ચ દદૌ તત્સૃષ્ટાનાં
રુદ્રાણામસઙ્ખ્યાતતાં દૃષ્ટ્વા તં ભયાત્તપસે ન્યયોજયત્સ ભુવિ
તપશ્ચચારેતીતિહાસઃ ।
શિખણ્ડિનમ્ શિખણ્ડો બર્હચૂડયોઃ ઇતિ વિશ્વઃ ।
તયોરન્યતરદસ્યાસ્તીતિ શિખણ્ડી તં દિવઃ સકાશાદુગ્રો
રુદ્રોઽવારુક્ષદવતીર્ણવાન્ । પ્રત્યષ્ઠાત્ ।
પ્રતિષ્ઠાં સ્થિતિં કૃતવાન્ । ભૂમ્યામધિ ।
અધિરીશ્વર ઇત્યધિઃ કર્મપ્રવચનીયઃ ।

યસ્માદધિકં યસ્ય ચેશ્વરવચનમિતિ સપ્તમી ।
ભૂમેરીશ્વર ઇત્યર્થઃ ।
જનાસઃ પશ્યતેમં નીલગ્રીવં વિલોહિતમ્ ॥

એષ એત્યવીરહા રુદ્રો જલાસભેષજીઃ ॥

વિ તેઽક્ષેમમનીનશદ્વાતીકારોઽપ્યેતુ તે ॥

જનાસ । આજ્જસેરસુક્ । સંવોધને ચેતિ પ્રથમા । એત્યાગચ્છતિ ।
ન વીરહાઽવીરહા સૌમ્યઃ । યદ્વાઽવીરાણિ પાપાનિ હન્ત્યવીરહા ।
એત્યાઽઽગત્ય વીરાન્દૈત્યાન્હન્તીતિ વા । જલ આસઃ ક્ષેપો યાસાં તા
જલાસાશ્ચ તા ભેષજ્યશ્ચ તા એતીત્યન્વયઃ ।
જલક્ષિપ્તાનામોષધીનામમઙ્ગલનાશકત્વં રુદ્રસન્નિધાનાદેવ ।
યદ્વા સમુદ્રમથનાવસરે સમુદ્રે ક્ષિપ્તાનામોષધીનામુદ્ભૂતં
વિષં પાતુમવતીર્ણત્વાદેવમુક્તમ્ । તે તવ લોકસ્યાક્ષેમં
વ્યનીનશત્ । અનેન ક્ષેમકારિત્વમુક્તમ્ । અલબ્ધલાભો
યોગસ્તત્કારિત્વમપ્યાહ । વાતીકાર ઇતિ ।
વાતિઃ પ્રાપ્તિઃ । અપ્રાપ્તં પ્રાપ્તં કરોતીતિ વાતીકારઃ સોઽપિ તે
તવાપૂર્વલાભકરોઽપ્યેત્વાગચ્છતુ ।
યોગક્ષેમકરોઽભિષેકજલે સન્નિહિતો ભવત્વિત્યર્થઃ ।
મન્ત્રલિઙ્ગાદભિષેકે વિનિયોગઃ ।
નમસ્તે ભવ ભામાય નમસ્તે ભવ મન્યવે ॥

નમસ્તે અસ્તુ વાહુભ્યામુતોત ઇષવે નમઃ ॥

ભામઃ ક્રોધઃ । મન્યુસ્તત્પૂર્વાવસ્થા । ઉતાપિ ।
ઉતેષવે બાણરૂપાય । અસ્તવે । અસુ ક્ષેપણે
તવેન્પ્રત્યયસ્તુમર્થે । અસ્તુ ક્ષેપ્તુમિત્યર્થઃ ।
યામિષું ગિરિશન્ત હસ્તે બિભર્ષ્યસ્તવે ॥

શિવાં ગિરિત્ર તાં કૃણુ મા હિંસીઃ પુરુષાન્મમ ॥

કં ક્ષેમું ગિરિશન્તં શ્યતિ શ્યન્ગીરે
શ્યન્ગિરિશ્યન્સમ્બન્ધસામાન્યે ષષ્ઠ્યા સમાસઃ ।
તં ગિરિશન્તમ્ । છાન્દસો યમલોપઃ ।
યદ્વા કંશમ્ભ્ંયા વભયુસ્તિતુતયસઃ । શમસ્યાસ્તિ શન્તો ?? kaMshambhMyA
ગિરિણા શન્તઃ સુખી પર્વતોત્પન્નત્વાદિષોઃ ।

હે ગિરિત્ર ગિરિરક્ષક તાં શિવાં કલ્યાણીં કુરુ ।
શિવેન વચસા ત્વા ગિરિશાચ્છા વદામસિ ।
યથા નઃ સર્વમિજ્જગદયક્ષ્મં સુમના અસત્ ॥

યા ત ઇષુઃ શિવતમા શિવં બભૂવ તે ધનુઃ ।
શિવા શરવ્યા યા તવ તયા નો મૃડ જીવસે ॥

અચ્છા વદામસિ । અચ્છ નિર્મલં વદામઃ ।
અચ્છશબ્દસ્ય નિપાતસ્ય ચેતિ દીર્ઘઃ ।
ઇદન્તો મસિ । ઇદનર્થકો નિપાતઃ । અયક્ષ્મં નીરોગમ્ ।
સુમનાઃ સુમનસ્કમ્ । અસદ્ભવેત્ ।
લિઙર્થે લેટ્ । તિપ્ । ઇતશ્ચ લોપઃ પરસ્મૈપદેષુ ।
લેટોઽડાટાવિત્યટ્ । શરવ્યા શરસન્ધાત્રી
જ્યા શરો દધ્યગ્રબાણયોઃ ઇતિ વિશ્વઃ । શરમર્હતિ યત્ ।
અવ્શરસ્ય ચેત્યવાદેશઃ । શરુશબ્દાદ્વા સિદ્ધમ્ ।
શરુરાયુધકોપયોઃ । ઉગવાદિભ્યો યત્ । જીવસે જીવિતું મૃડ મોદય ।
યદ્વા હે મૃડ તયા તન્વા નોઽસ્માઞ્જીવસે જીવયસિ ।
યા તે રુદ્ર શિવા તનૂરઘોરા પાપકાશિની ।
તયા નસ્તન્વા શન્તમયા ગિરિશન્તાભિચાકશત્ ॥

અસૌ યસ્તામ્રો અરુણ ઉત બભ્રુર્વિલોહિતઃ ।
યે ચેમે અભિતો રુદ્રા દિક્ષુ શ્રિતાઃ સહસ્રશો વૈષાં
હેડ ઈમહે ॥ ૧॥

શન્તમયા । અતિશયેન શં શન્તમા તયા । અભિચાકશત્ ।
કશેર્યઙ્લુઙન્તાલ્લેટ્તિ- પટ્ ।
અતિશયેન પ્રકાશયત્વિતિ પ્રાર્થના ।
બભ્રૂઃ પિઙ્ગલો વૈષાં હ ઈડે સ્તુતયે । ઈમહે કામયામહે ।
વિષ્ણુપક્ષ આભીરાઃ ॥ ૧॥

અદૃશ્યં ત્વાઽવરોહન્તં નીલગ્રીવં વિલોહિતમ્ ॥

ઉત ત્વા ગોપા અદૃશન્નુત ત્વોદહાર્યઃ ॥

ઉતો ત્વા વિશ્વા ભૂતાનિ તસ્મૈ દૃષ્ટાય તે નમઃ ॥

ગોપા ગોપાલા અદૃશન્નપશ્યન્ । ઉદહાર્યઃ પાનીયહારિણ્યઃ ।

વિશ્વા વિશ્વાનિ ભૂતાનિ । અદૃશન્ । યોગિનાપ્યદૃશ્યં ત્વાં
કૃપયાऽऽવિર્ભવન્તમાદિત્યવત્પ્રકાશમાનં પામરા અપિ દદૃશુરિત્યર્થઃ ।
નમોऽસ્તુ નીલશિખણ્ડાય સહસ્રાક્ષાય વાજિને ॥

અથો યે અસ્ય સત્ત્વાનસ્તેભ્યોऽહમકરં નમઃ ॥

વાજિનેऽન્નવતે બાણરૂપાય વા । સીદન્તિ સત્ત્વાનો ગણાઃ ।
નમાંસિ ત આયુધાયાનાતતાય ધૃષ્ણવે ।
ઉભાભ્યામકરં નમો બાહુભ્યાં તવ ધન્વને ॥

પ્રમુઞ્ચ ધન્વનસ્ત્વમુભયો રાજ્ઞોર્જ્યામ્ ।
યાશ્ચ તે હસ્ત ઇષવઃ પરા તા ભગવો વપ ॥

નમાંસિ નમસ્કારાઃ । નાऽऽતતાયાનાતતાય ।
ધૃષ્ણવે પ્રગલ્ભાય । બાહુભ્યાં કૃત્વા ધન્વને
નમોऽકરવમિત્યર્થઃ । ઉભયોરરિપ્રત્યરિભૂતયો
રાજ્ઞોર્ધન્વનોર્જ્યાં પરિપ્રમુઞ્ચાનાતતાં કુરુ ।
રાજ્ઞોર્વિગ્રહે લોકાનાં ક્લેશો ભવતિ તતસ્તં શમયેતિ ભાવઃ ।
હે ભગવો યાસ્તે હલ ઇષવો બાણાસ્તાઃ પરા વપ પરાઙ્મુખાન્મુઞ્ચ ।
ત્વમપિ કોપં લોકેષુ મા કૃથા ઇતિ ભાવઃ ।
ઇન્દ્રરૂપેણ જગદ્રક્ષેતિ પ્રાર્થયતે-
અવતત્ય ધનુસ્ત્વં સહસ્રાક્ષ શતેષુધે ।
નિશીર્ય શલ્યાનાં મુખા શિવો નઃ શમ્ભુરાભર ॥

વિજ્યં ધનુઃ શિખણ્ડિનો વિશલ્યો બાણવાꣳ ઉત ।
અનેશન્નસ્યેષવઃ શિવો અસ્ય નિષઙ્ગતિઃ ॥

અવતત્યેતિ । અધિજ્યં કૃત્વા । સહસ્રાક્ષ શક્રરૂપ ।
શતમિષુધયસ્તૂણા યજ્ઞરૂપા યસ્ય તત્સમ્બોધનમ્ ।
નિશીર્ય તીક્ષ્ણીકૃત્ય મુખા મુખાનિ નોऽસ્માચ્છિવઃ કલ્યાણરૂપઃ
શમ્ભુઃ સુખહેતુઃ સન્નાભર ધારય પોષય ।
બાણવાંસ્તૂણીરો વિશલ્યોऽસ્તુ । શલ્યરહિતો ભવતુ । વૈરિષુ હતેષુ
તત્પ્રયોજનાભાવાત્ । અનેશન્નદૃભ્યા અભૂવન્ ।
નશિમન્યોરલિટ્યેત્વમિતિ વાર્તિકેન લુઙિ પુષાદ્યઙ્યેત્વમ્ ।
નિષઙ્ગતિઃ । નિષઙ્ગઃ ।

પરિ તે ધન્વનો હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ ।

અથો ય ઇષુધિસ્તવારે અસ્મિન્નિધેહિ તમ્ ॥

યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે ધનુઃ ।
તયા ત્વં વિશ્વતો અસ્માનયક્ષ્મયા પરિભુજ ॥

વિશ્વતઃ સર્વતોઽસ્માન્પરિવૃણક્તુ પરિવૃત્ય રક્ષતુ ।
અરે સમ્બોધને । અથો પશ્ચાદ્રક્ષણાનન્તરં
યસ્તવેષુધિરસ્મિન્નિષુધૌ તાં હેતિં બાણં નિધેહિ સ્થાપય ।
હે મીઢુષ્ટમ મીઢવત્તમેત્યર્થઃ । સેચકતમ ।
અયક્ષ્મયા સજ્જયા તયા હેત્યા પરિભુજ પરિપાલય ।
નમોઽસ્તુ સર્પેભ્યો યે કે ચ પૃથિવીમનુ ।
યે અન્તરિક્ષે યે દિવિ તેભ્યઃ સર્પેભ્યો નમઃ ॥

યે ચામી રોચને દિવિ યે ચ સૂર્યસ્ય રશ્મિષુ ।
યેષામપ્સુ સદસ્કૃતં તેભ્યઃ સર્પેભ્યો નમઃ ॥

યા ઇષવો યાતુધાનાનાં યે વા વનસ્પતીનામ્ ।
યે વાઽવટેષુ શેરતે તેભ્યઃ સર્પેભ્યો નમઃ ॥ ૨॥

સદસ્કૃતં ગૃહં કૃતમ્ । યાતુધાનાનાં રક્ષસાં
વનસ્પતીનાં ચેષવઃ સર્પાસ્તે હિ જનાન્દશન્તિ ।
અવટેષુ ગર્તેષુ ॥ ૨॥

કેદારાધીશમહિષસ્વરૂપં સ્તૌતિ-
યઃ સ્વજનાન્નીલગ્રીવો યઃ સ્વજનાꣳ હરિરુત ।
કલ્માષપુચ્છમોષધે જમ્ભયાઽઽશ્વરુન્ધતિ ॥

ય ઇતિ । યઃ શિવઃ સ્વજનાન્ભક્તાન્પ્રતિ નીલગ્રીવઃ ।
યશ્ચ સ્વજનાન્ભક્તાન્પ્રતિ હરિર્હરિતવર્ણો ભક્તવત્સલો ન ભવતિ ।
મહિષસ્ય હિ તાદૃગ્રૂપં સમ્ભવતિ ।
યદ્વા નીલગ્રીવો રુદ્રો હરિર્વિષ્ણુશ્ચ ભવતિ ।
અનેન હરિહરયોરેકરૂપતોક્તા । હે ઓષધે । અરુન્ધતિ રોધરહિતે
તં કલ્માષપુચ્છં કૃષ્ણપાણ્ડુરપુચ્છમ્ ।
આશુ શીઘ્રં જમ્ભય સ્વવીર્યેણ વીર્યવન્તં કુરુષે ।
ઔષધીનાં પશુભ્યો બલપ્રદત્વાત્ ।
કલ્માષો રાક્ષસે કૃષ્ણે કલ્માષઃ કૃષ્ણપાણ્ડુરે ઇતિ વિશ્વઃ ।
કેદારેશ્વરસ્ય મહિષરૂપત્વાત્પુચ્છવત્તા સમ્ભવતિ ।

બભ્રુશ્ચ બભ્રુકર્ણશ્ચનીલાગલશીલાઃ શિવઃ ।
પશ્ય સર્વેણ નીલશિખણ્ડેન ભવેન મરુતાં પિતા ॥

વિરૂપાક્ષેણ બભ્રુણા વાચં વદિષ્યતો હતઃ ।
સર્વનીલશિખણ્ડેન વીર કર્મણિ કર્મણિ ॥

બભ્રુઃ ક્વચિદવયવે પિઙ્ગલવર્ણઃ ।
બભ્રુકર્ણઃ પિઙ્ગલવર્ણકર્ણઃ । નીલાગલશીલાઃ શિવ ઇત્યત્ર
નીલગ્રીવશ્ચ યઃ શિવ ઇતિ પાઠો યુક્તઃ । પિતેતિ ।
તૃતીયાર્થે પ્રથમા પિત્રેત્યર્થઃ । અથ વાચં વદિષ્યતઃ પિતા
દેહિમાત્રસ્ય જનકો બ્રહ્મા યેનેશ્વરેણ હતસ્તં ત્વં પશ્યેત્યન્વયઃ ।
હે વીર કર્મણિ કર્મણિ વિહિતનિષિદ્ધરૂપે ।
ઇમામસ્ય પ્રાશં જહિ યેનેદં વિભજામહે ।
નમો ભવાય નમઃ શર્વાય નમઃ કુમારાય શત્રવે ॥

નમો નીલશિખણ્ડાય નમઃ સભાપ્રપાદિને ॥

ઇમામસ્ય જનસ્ય । પ્રાશં પૃચ્છતીતિ પ્રાટ્તાં પ્રાશં
પ્રચ્છિકાં વાચમ્ । જહિ વેદવિહિતં
નિષિદ્ધકર્મવિષયં સંશયં નિરાકુર્વિત્યર્થઃ ।
યેન કર્મણેદં જગદ્વિભજામહે કર્મભૂમિભોગભૂમિરૂપેણ
વિભક્તં કુર્મહે । કુમારાય કાલાનભિભૂતાય સ્કન્દરૂપાય વા ।
શત્રવે સંહર્ત્રે । સભાપ્રપાદિને
સભાં પ્રપદ્યતે તચ્છીલ સભાપ્રપાદી તસ્મૈ સભ્યાયેત્યર્થઃ ।
યસ્ય હરી અશ્વતરૌ ગર્દભાવભિતઃસરૌ ।
તસ્મૈ નીલશિખણ્ડાય નમઃ સભાપ્રપાદિને
નમઃ સભાપ્રપાદિન ઇતિ ॥ ૩॥

ઇત્યથર્વવેદે નીલરુદ્રોપનિષત્સમાપ્તા ॥ ૧૮॥

અશ્વતરૌ ઈષદૂનમશ્વત્વં યયોસ્તાવશ્વતરૌ ગર્દભાદશ્વાયાં
જાતૌ । અભિતઃસરાવભિતઃ સરત ઇત્યભિતઃસરૌ ગર્દભૌ વર્તેતે ।
યથા પુરુષોત્તમક્ષેત્રસ્ય નીલમાધવોઽધિષ્ઠાતૈવં
કેદારક્ષેત્રસ્ય નીલરુદ્રઃ । દ્વિરુક્તિઃ સમાપ્ત્યર્થા ॥ ૩॥

નારાયણેન રચિતા શ્રુતિમાત્રોપજીવિના ।
અસ્પષ્ટપદવાક્યાનાં નીલરુદ્રસ્ય દીપિકા ॥ ૧॥

ઇતિ નારાયણવિરચિતા નીલરુદ્રોપનિષદ્દીપિકા સમાપ્તા ॥ ૨૪॥

Encoded and proofread by Sunder Hattangadi

---

*nIlarudropaniShat with commentary*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*